National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2015; 1(2): 11-12
© 2015 NJHSR
www.sanskritarticle.com
Received: 27-10-2015
Accepted: 28-10-2015

**जोगिन्द्रकुमार**
शोधच्छात्रः (शिक्षाशास्त्रविभागः),
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत
विद्यापीठम् ,नवदेहली-110016

**Correspondence:**
**जोगिन्द्रकुमार**
शोधच्छात्रः (शिक्षाशास्त्रविभागः),
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत
विद्यापीठम् ,नवदेहली-110016

# वर्तमानपरिप्रेक्ष्ये अणुव्रतानामुपयोगिता

**जोगिन्द्रकुमार**

जैनदर्शने पञ्चाणुव्रतानां महत्त्वपूर्णस्थानं विद्यते। श्रमणस्य अहिंसादिपञ्चमहाव्रतानामपेक्षया लघुत्वात् प्रथम पञ्चव्रतानि अणुव्रतं कथ्यते। यथा प्रकारेण सर्वविरतश्रमणस्य कृते पञ्चाणुव्रतानि। जीवः रूपाणि भवन्ति एतेषां व्रतानामभावेन श्रामण्यनिर्जीवः भवति तथैव पञ्चाणुव्रतानामभावेन श्रावकधर्मनिष्प्राणः भवति।

**अणुव्रतस्य स्वरूप**

स्थूलप्राणघातात् स्थूलसत्यभाषेण स्थूलचैर्येण स्थूलकायेण स्थूलममता भावरूपमून्च्छादिभिः पापैः विरक्तभावः अणुव्रतमुच्यते।

**अणुव्रतस्य भेदाः**

पञ्चपापेभ्यः एकदेशविरक्तरूपत्वात् अणुव्रतस्य पञ्चभेदाः सन्ति - अहिंसाणुव्रतम् 2. सत्याणुव्रतम्, 3. अस्तेयाणुव्रतम् 4. ब्रह्मचर्याणुव्रतम्, 5. परिग्रहपरिणामणुव्रतम्।

अणुव्रतानां संख्याविषये नास्तिमतभेदः, किन्तु चतुर्थपञ्चाणुव्रतयोः मतभेदः प्राप्यते। आचार्यसमन्तभद्रेण चतुर्थाणुव्रतस्य नाम परदारनिवृत्तिः एवं स्वदारसन्तोषः। तथा पञ्चमस्य परिग्रहपरिणामः इच्छापरिमाणः वा प्रदतम्।आचार्यरविषेणमहोदयेनांपे चतुर्थव्रतस्य नाम परदारसमागमविरतिः एवं पञ्चमस्य अनन्तविरतिरति नाम प्रदत्तम्। आचार्यजिनसेनः हरिवंशपुराणे प्रथमव्रतस्य नाम ‘ दया’ इति कथितम्। आचार्यजिनेसन(द्वितीय)महोदयेन आदिपुराणे चतुर्थव्रतस्य नाम परस्त्रीसेवननिवृत्तिः तथा पञ्चमव्रतस्य नाम तृष्णप्रकर्षनिवृत्तिः इति प्रदत्तम्। आशाधरमहोदयेन व्रतस्य नाम स्वदारसन्तोष इति कृतम्।

**अहिंसाणुव्रतम्**

हिंसायाः निवृत्तिः अहिंसा कथ्यते। प्रमादस्य योगः ‘ रागद्वेषरूपप्रवृत्तेः कारणात् प्राणस्य व्यपरोपणं पीडनं’ विनाशं हिंसा भवति। स्थूलहिंसाया विरक्तरेव अहिंसाणुव्रतम्। रत्नकरण्डश्रावकाचारग्रन्थे समन्तभद्रेण अहिंसाणुव्रतस्य स्वरूपमेव प्रस्तुतम्-

**सघङ्कल्पात्कृतकारितमनन योगत्रायस्य चरसत्वात्।**
**न हिनस्ति यत्तदाहुः स्थूलवधद्विरमणं निपुणाः।।**

भावोऽयं विद्यते यत् मनसा वाचा कर्मणा कृतकारितानुमोदनारूपसंकल्पद्वारा त्रसजीवानां हिंसा नैव करोति चेत् तत् स्थूलवधविरमणं कथ्यते।

सर्वार्थसिद्धिग्रन्थे पूज्यपादमहोदयेन एवं कथितं यत् त्रस् प्राणाघाताभावरूपकर्ता अहिंसाणुव्रती कथ्यते। ‘ तस्मिन् न तु मनोवचनकायकारितानुमोदनायाः उल्लेखाऽस्ति न वा। संकल्पस्यैव उल्लेखः वर्तते। तत्त्वार्थवार्तिके त्रिधा पदं मनसा-वचसा-कर्मणाकृतकारित अनुमोदनानां निर्देशः वर्तते। किन्तु संकल्पस्योल्लेखः तत्रापि नास्ति वसुनन्दिश्रावकाचारे त्रसजीवानां हिंसायाः सर्वथा त्यागः तथा निष्प्रयोजनस्थावरजीवानां हिंसायाः त्यागः एव अहिंसाणुव्रतमुक्तम्।

श्रीजयसेनविरचित धर्मरत्नाकरे पुरुषार्थसिद्ध्युपायस्यैकस्मिन् श्लोके कथितमस्ति यत् अहिंसामयधर्मस्य स्वरूपं श्रृण्वन्नापि यः जीवः स्थावरहिंसा न त्यजति, तेन त्रसहिंसा तु त्यक्त्वा एव। एवं अप्रशस्तरूपासत्यं निर्बलबुद्धिः मनुष्यैः दुरादेव परित्यक्तव्यम्।

**सत्याणुव्रतम्**

समन्तभद्राचार्यः सत्याणुव्रतस्य लक्षणं कथयन् लिखति यः साधकः न तु स्थूलासत्यभाषणं करोति न अन्यान् वाचयति, तथा च वित्तिजनकवचनं न वदति न वा अन्यान् वाचयति सः सज्जनः सत्याणुव्रती कथ्यते।सत्याणुव्रतस्य कृते प्राचीननाम स्थूलमृषावाद विरमणम् अस्ति। आचार्यकुन्दकुन्देनापि अस्यैव शब्दस्य प्रयोगः कृताऽस्ति। ‘ सावधम्मदोहाया’ दोहाकारेण सत्याणुव्रतविषये एवं कथितमस्ति -

**अलिय कसायिहं मा चवहि अलिएं गठ वसुराइ ।**
**जहिं णिविट्ठु सा खंडु तह डालहु होइ पपाउ ।।**

अर्थात् कषायात् असत्यं वा वद् असत्यकारणेनैव वसुराजागतः। यस्यां शाखायां शाखाण्डं (द्रोही) उपविष्टः अस्ति तस्यां शाखायां सत्यस्य नाशाऽभवत्।

**अचैर्याणुव्रतम्**

अप्रदत्तवस्तुनः अधिग्रहणं चैर्यमस्ति। अस्माभिप्रायोऽस्ति यत् बाह्यवस्तुनः अधिग्रहणसंक्लेशपरिमाणानां नाम चैर्यमिति। यद्यपि वस्तु ग्रहणं न स्यात् तथापि संकल्पमात्रचैर्यमित्युच्यते स्थूलपौर्यस्य त्यागः अचैर्याणुव्रतमस्ति। समन्तभद्राचार्येण अचैर्याणुव्रतविषये एवं कथितमस्ति यत् स्थापितपतित-विस्मृतादि-द्रव्याणामपहरणमेवं अन्येभ्यः अप्रदानमचैर्याणुव्रतमस्ति।

स्वामीकार्तिकेयानुसारं अचैर्याणुव्रती सः अस्ति यः बहुल्यवस्तु अल्पमूल्ये न स्वीकरोति अन्येषां विस्तृतवस्तुः न स्वीकरोति, न्यूनलाभेनैव सन्तुष्टो भवति, क्रोध्मानलोभकपटादिभिः परद्रव्यस्य हरणं न करोति।

आचार्यामृतचन्द्रमहोदयेन पुरुषार्थसिद्ध्युपायग्रन्थे चैर्यस्य स्वरूपं कथयन् विपरीतमस्ति। यत् धनं मानस्य बाह्यप्राणेऽस्ति, अतः धनस्य हरणं प्राणहरण इव अस्ति इति। यः जलाशयात् जलादि स्वीकर्तुं वर्तते असमर्थः तेनापि अन्येषां अप्रदत्तवस्तुनः ग्रहणस्य त्यागः करणीयः।

सावयधम्मदोहाग्रन्थे अचैर्याणुव्रतविषये एवं कथितमस्ति-

**णासइ धणु तसु धरतणउ जो पददव्व हरेई।**
**गेहिं कवऽठ पेसियः काइं ण काइ करेइ।।**

अर्थात् यः परद्रव्यस्य हरणं करोति तस्य गृहस्य धनमपि नश्यते। येन गृहे कपटवेशितं सः किं किं न करोति।

**ब्रह्मचर्याणुव्रतम्**

चारित्रामोहनीयकर्मणः उदये सजातीयविजातीयमिथुनस्य स्पर्शनादिक्रियाः अब्रह्म वर्तते। एवमस्य त्यागः ब्रह्मचर्यं वर्तते। ब्रह्मचर्याणुव्रतस्य वर्णनं कुर्वन् रत्नकरण्डश्रावकाचारे कथितमस्ति यत् यः पापभयात् न परस्त्रीगमनं करोति न वा अन्यान् गमयति सः परस्त्रीत्यागसन्तोषः एव स्वस्त्रीसन्तोषनामक ब्रह्माचर्याणुव्रतमस्ति।

आचार्यवसुनन्दिनः कथनमस्ति यत् अष्टमी चतुर्दशा आदिपर्वदिनेषु स्त्रीसेवनं तथा सदैव अण्गक्रीडायाः त्यागकर्ता भगवती स्थूलब्रह्मचारी कथिताऽस्ति इति।

स्वामीकार्तिकेयानुसारं यः स्त्रीशरीरं दुर्गन्धितम् अशुचिमयं ज्ञात्वा तस्याः रूपलावण्यमपि मनसि मोहतनकं मनुते तथा मनसा-वाचा-कर्मणा परस्त्रीयं मातृभागिनी पुत्रीवत् व्यवहरति सः श्रावकः स्थूलब्रह्मचारी अस्ति।

अमृतचन्द्राचार्यस्य कथनमस्ति यत् यः जीवः मोहकारणात् स्वविवाहितां पत्नीं त्यक्तुमसमर्थः अस्ति तेनापि शेषसर्वं स्त्रीसेवनं त्यक्तव्यम्।

पूज्यपाददेवनन्दिना सर्वार्थसिद्धिग्रन्थे लिखितमस्ति गृहीताग्रहीतपरस्त्री सह रतित्यागः गृहस्य चतुर्थाणुव्रतम्। सोमदेव लिखति यत् वधुः एवं वितस्त्रियं त्यक्त्वा मातृभगिनीपुत्रीस्मरणं व्यवहारे गृहस्य ब्रह्मचर्यमस्ति।

सावयधम्मदोहायां दोहाकारः लिखति -

**मणि इन्छिया परमहिल रावणु सीय विण्ट्ठु।**
**दिट्ठिइं मारइ जिट्ठिविसु ता को जीवइ दट्ठु।।**

भावाऽयं विद्यते यत् मानकारणात् परस्त्रीसीतायाः हरणकारणात् रावणस्य नाशाऽभवत्। दृष्टिविषः दृष्टिमात्रेण मारयति तत्रा गमने सति को वा जीवति।

**परिग्रहपरिमाणानुव्रतम्**

इदं वस्तु मम अस्ति। अहं अस्या स्वामी अस्मि इति एवं ममत्वं परिमाणानुव्रतम् अस्ति। श्रीशुभचन्द्राचार्यस्यानुसारं परिग्रहैव दुःखानां मूलकारणामस्ति। यतः परिग्रहेण कामोत्पत्तिः भवति। कामात् क्रोधः, क्रोधात् हिंसा, हिंसात् पापः, पापात् नरकप्राप्तिः भवति। ' नरके तु अकथनीयमत्यन्तं दुःखं भवति। दुःखस्य विषयोऽस्ति यत् जनाः हिंसादिकर्माणि पापकर्माणि स्वीकुर्वन्ति। किन्तु परिग्रहं पापकर्मं न मन्यते। वस्तुतः एतानि सर्वाण्यपि कर्माणि पापकर्माणि सन्ति।

समन्तभद्राचार्यानुसारं धनधान्यादिपरिग्रहं परिमितं कृत्वा एतावत् आवश्यकमस्ति विचिन्त्य तताऽप्यधिकस्य अनिच्छा एव परिग्रहपरिमाणाणुव्रतम्। एतत् इच्छापरिमाणाणुव्रतमित्यपि उक्तमस्ति। कार्तिकेयानुप्रेक्षायां कथितमस्ति यत् यो लोभकषायां न्यूनीकृत्वा सन्तोषरूपी उच्छवासं स्वीकरोति, एवं सर्वं विनश्वरं मत्वा तृष्णायाः नाशं करोति। एवञ्च आवश्यकतानां ज्ञात्वा धनधान्यसुवर्णनेत्रादिपरिमाणं करोति तत् पञ्चम-अणुव्रतं भवति।

परिग्रहाणुव्रते तु धनधान्यादिना आवश्यकतानुसारं क्रियते। किन्तु परिग्रहत्यागप्रतिमायां एतेषां त्यागः क्रियते।

**आधुनिकपरिप्रेक्ष्ये उपयोगिता**

अद्य मानवः हिंसायाः चरमसीम्नि वर्तते। विश्वऽस्मिन् आतंकवादः द्रुतगत्या प्रसरति। मांसमद्यादिनां सेवनं वर्धितम्। व्यापारस्य साधनञ्च जातम्। सर्वत्र अशान्तिः दृश्यते, अस्यां परिस्थितौ अणुव्रतानां पालनमेव अस्माकं रक्षां कर्तुं शक्नोति। चैर्यं कृत्वा, चैर्यं कारयित्वा, आयकरेषु विक्रयकरणे च उत्कोचं स्वीकृत्य मापने न्यूनाधिक्येन च जनानां लुण्ठनं कुर्वन्ति जनाः।तथैव व्यापारिणः महार्यवस्तुषु निम्नवस्तूनां मेलनं कृत्वा जनाः अनुरक्षं धनाढ्या भवितुं दृश्यन्ते। जनसंख्यानुपाते जैनमतावलम्बिनां संख्या न्यूना अस्ति, तेषु अचैर्याणुव्रतस्य शिक्षां प्रदाय अतिचारैः रक्षितुं प्रयासो भवितव्यः। आचार्यैः परिग्रहं सर्वेषु पापेषु ज्येष्ठः कथितः। किन्तु अपरधर्मस्य विषयाऽयं यत् पापलिप्तजनाः परिग्रहं पापं न स्वीकुर्वन्ति। यदि वयं ' जीयो और जीने दो' इति भावना स्थापयामश्चेत् अस्माभिः इच्छानां निग्रहणं कर्तव्यम्। एवं परिग्रहपरिमाण-अणुव्रतम् आचरणीयम्। एतानि पञ्चाणुव्रतानि मानव-समाज-राष्ट्र-विश्वानां नैतिकोत्थानाय परमावश्यकमस्ति। आधुनिकपरिप्रेक्ष्ये अणुव्रतानां सामायिकप्रयोगस्य महती आवश्यकता वर्तते। अयमेव व्यक्तिनिर्माणस्य आधारभूमिः इति।

**सन्दर्भग्रन्थाः**


1 रत्नकरण्डश्रावकाचारः, समन्तभद्रः, वीरसेवा मन्दिर, काशी, 1972
2. हरिवंशपुराणम्, जिनसेनः, भारतीय ज्ञानपीठ, नई दिल्ली, 1978
3. सर्वार्थसिद्धिः, आचार्य पूज्यपादविरचित, भारतीय ज्ञानपीठ, लोदी रोड, नई दिल्ली, 1935
4. तत्वार्थवार्तिकम्, अकलंक, भारतीय ज्ञानपीठ, नई दिल्ली, 1953
5. वसुनन्दिश्रावकाचार, वसुनन्दि, पं. हीरालाल जैन, भारतीय ज्ञानपीठ, नई दिल्ली, 1962
6. सावधम्मदोहा, लक्ष्मीचन्द्रः, कारजा जैन ग्रन्थमाला, 1932
7. कार्तिकेयानुप्रेक्षा, कार्तिकेय, श्रीदिगम्बर जैन, कुन्दकुन्द परमागम ट्रस्ट, इन्दौर, 1960
8. पुरुषार्थसिद्ध्युपायः, अमृतचन्द्र, खारा कुआँ, बम्बई, चतुर्थ संस्करण, 1953
9 उपासकाध्ययनम्, सोमदेवसूरि, कैलाशचन्द्रशास्त्री, भारतीय ज्ञानपीठ, नई दिल्ली, 1964
10. ज्ञानार्णव, शुभचन्द्र, श्रीमद्राजचन्द आश्रम, अगास, 1961
11. लाटी संहिता, राजमल्ल, मणिकचन्द ग्रन्थमाला, बम्बई, 1984